नं. — ४९९९

नाम. समास वादः

कर्ता. रामभद्र सार्वभौमः

पत्र सं. २ —— सं. ५

विषय. न्याय वैशेषिकः

समासवादः

४९५५

[illegible]

Cat

p 155

4999

F. = 2

ॐनमः महावाक्यैःसार्द्धंभीमरामभट्टेनधीमता समासेनसमासानांतत्त्वमत्रविविच्यते १ अथवहुव्रीहौचित्रगुमानयेत्यादौचित्रगोस्वामिनोवोधो
नगोपदस्यचित्रपदस्योभयपदस्यवा चित्रगोस्वामिनिलक्षणया एकपदस्यैवैयर्थ्यप्रसङ्गात् नापिगोपदंगोस्वामिलक्षकं गविचचित्रपदस्याभेदेनान्वयवो
धः पदार्थैकदेशेऽभेदेनान्वयस्याव्युत्पन्नत्वात् अन्यथापशुरपशुर्वेदोऽन्यादेरपिविनालक्षणांयोगपत्तापत्तेः पशवादिपदार्थैकदेशेलोमलाङ्गूलादे
पशवादिभिन्नत्वाभावात् नचगोपदेनशक्त्योपस्थापितस्यगोश्चित्रान्वितस्यलक्षणयोपस्थापितेनस्वामिनान्वयः गंगायांघोषमत्स्यावितिवदेकपद
वृत्तिवृत्तिद्वयेनानेकान्वयवोधजननेव्युत्पत्तिविरहादितिवाच्यम् एकपदार्थयोःपरस्परमन्वयवोधस्य नामार्थयोर्भेदान्वयवोधस्यचाव्युत्पन्नत्वात् ।
अतएवहरिपदादुपस्थितयोःसिंहकृष्णयोराधाराधेयभावादिनाघटःकर्मत्वमित्यादौवाधारधेयभावेनान्वयः नापिचित्रगोसमुदायेलक्षणा
समुदायेशक्त्यभावात् शक्यसम्बन्धस्यलक्षणात्वात् ननुवोध्यसंवन्धएवलक्षणाभवति चित्रगोसमुदायस्यचित्रगोर्वोध्या तत्सम्बन्धश्चास्ति
वचित्रगोस्वामिनि नचैवमपभ्रंशस्यापिशक्तिभ्रमेणवोध्यत्वात्तत्रापिलक्षणास्यादिष्टत्वात् नचैवंतस्यसाधुतास्यात् वृत्तिमत्त्वंहिपदस्य। मेव
युक्ता वृत्तित्वंचशक्तिलक्षणान्यतरत्वमितिवाच्यम् तत्रलक्षणापदेनशक्यसम्बन्धस्यैवव्यवहृतत्वात् अन्यथावाप्रमयावोध्यस्यसंवंधोलक्षणे
तिचेन्न तद्बोध्यत्वंहितज्जन्यस्यवोधस्यविषयत्वं शाब्दबोधस्यवा नाद्यः कारणत्वादिसंवंधेनघटपदस्यापिगगनादेःसंवंधग्रहादुपस्थि
तस्याप्यन्वयवोधापत्तेः शक्त्यावोध्यत्वाभिधानेचवाक्येलक्षणा शक्यत्वापत्तयागोरवंच नद्वितीयः गंगायांघोषइत्यत्रगंगापदेलक्षणा।
विरहप्रसंगात् तेनगंगापदेनप्रवाहशाब्दवोधाजननात् वृत्तिमत्त्वस्यैवपदस्यवोधकत्वेनान्योन्याश्रयाच्च किंचतत्त्वेनवोधकताभिधीयते वोधकता
मात्रंवा नाद्यः चित्रगोसमुदायेज्ञानत्वेनवोधकता किंतुचित्रादिशाब्दवोधेचित्रादिपदज्ञानत्वेनैवलाघवात् नेतरः यदिचानुपूर्वीविशेष
स्याकांक्षात्वात्तत्रशाब्दवोधेतादृशतादृशानुपूर्वीज्ञानत्वेनहेतुत्वेतिविभाव्यते तदागंगागंगायांघोषइत्यादावपिगंगागंगासमुदायस्यलक्षणया
वैयर्थ्याभावापत्तेर्नगंगादिपदज्ञानत्वेनापिहेतुताज्ञाभावात्तथाचगंगादिपदेलक्षणानस्यात् वस्तुतःसाक्षात्परंपरासाधारणसंवंधेनशक्तिज्ञा
नस्यशाब्दवोधसामान्यहेतुत्वात् शक्यसंवंधःपरंपरासंवंधेनशक्तिर्वालक्षणेतिनवोध्यसंवंधस्यलक्षणात्वसंभावनापीति यत्तुचित्रपदस्यचित्रस्वा
मिनिगोपदस्यगोस्वामिनिलक्षणा व्यक्तिवचनान्यायेनचचित्रत्वेनगोत्वेनैकस्याएवव्यक्तेर्वोधः आरूढवानरइत्यत्रचक्षत्रयस्यकर्तृसंवंधिनिवानरप
दस्यचवानरसंवंधिनिलक्षणा पक्षेत्यादिवच्चमत्तिवैचित्र्यादेकदेशेपिकतावारेहणस्यान्वयइतितन्न किंचगोस्वामीत्यादावकशाब्दवोधस्यसर्वानु
भवसिद्धस्योपपादयितुमशक्यत्वात् तस्माद्बहुव्रीहौसमुदायस्यचित्रगोस्वामिप्रभृतौशक्तिरेवेतिवैयाकरणाः अत्रोच्यते यत्किंचित्पदलक्ष

णयैवोपपत्तौनसमासेशक्तिरनन्यलभ्यस्यैवशब्दार्थत्वात् नचापरपदवैयर्थ्यम् तात्पर्यग्राहकतयास्वा
तंत्र्येणवाप्रकरणादिवोत्तदुपयोगात् लक्षणीयानिरूढत्वसंपादकत्वाच्च चित्रागेरित्यादिशाब्दमिका
न्वयवोधमादायनवैयर्थ्यमित्यपिकश्चित् अत्रपदैकत्रैवपदेलक्षणाप्रतिसंधीयते तदान्यपदसत्त्व
स्यैवशाब्दवोधप्रयोजिका उभयत्रतत्प्रतिसंधानेतद्द्वयोरेवतत्प्रयोजकत्वं विनिगमकाभावादिति प्रा
ञ्चः नव्यास्तूत्तरपदएवलक्षणा तत्पूर्वपदे विभक्त्यर्थान्वयापत्तेः सर्वपदार्थप्रधानद्वन्द्वादव्ययी
भावः

पूर्वपदार्थप्रधानादव्ययीभावादर्द्धपिप्पल्यादितत्पुरुषाच्च स्त्रसमासाच्चान्यत्र विभक्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वमुत्पत्तेः अव्यवहितपूर्व
वर्त्तिन एव पदस्य प्रकृतित्वात् अन्यथा राजपुरुषमानयेत्यत्रापि राजानमानयेति बोधापत्तेः अत एव चर्मभूतलमित्यादौ बहुव्रीहौ न ज एवा
त्यन्ताभाववत्तिलक्षणेति वदन्ति एतेन गंभीरायां नद्यां घोष इत्यादावपि व्याख्यातम् अत्रापि नदीपदस्य गंभीरपदस्य वा गंभीरनदीतीरपरत्वात् प
दान्तरस्य च प्रकरणादिस्थानीयत्वात् यद्यपि चित्रगुरित्यादौ चित्रपदं चित्रगोसंबंधिनिपरं गोपदं स्वामिपरं स्वामिनि च चित्रगोसंबंधिनस्तादा
त्म्येनान्वयात् संभवत्येव सर्वपदसार्थकता एवमारूढवानरः अपत्रयासुवानरारोहणपरः कप्रत्ययः कर्मत्वपरो वानरपदमाश्रयपरम् चैत्रद
त्तधनमित्यत्र चैत्रपदं चैत्रकर्तृकपरं दाधातुर्दानपरः क्तप्रत्ययः संप्रदानत्वपरः धनपदमाश्रयपरम् पृष्ठवानरपदवानरकर्तृकपरं तस्य च
धात्वर्थे आरोहणे भेदेनान्वयः कप्रत्ययश्च कर्मपरः एवं धनपदलक्ष्यस्य धनकर्मकस्य चैत्रकर्मकदानेन्वयः क्तप्रत्ययश्च संप्रदानपरः इति
गंभीरायां नद्यामित्यत्र गंभीरपदं गंभीरनदीसंबंधिपरं नदीपदं च तीरपरमिति तथापि चित्रगोस्वामीत्याकारकान्वयबोधे शोभनचित्रगु
रित्यादित्रिपदबहुव्रीहौ शोभनायां गंभीरायां नद्यामित्यादौ चोक्तैव रीतिः तत्र चित्रपदस्य शोभनचित्रगोसंबंधिपरत्वाय एवं वक्तव्यत्वात्
चित्रपदस्य चित्रगोसंबंधिपरत्वे गवि शोभनान्वयानुपपत्तेः पदलक्षणाप्रतिसंधानविरहिणां च समुदायशक्तिभ्रमादेवान्वयबोधः नव्या
स्तु पशुर्न पशुरित्यादावेकदेशे दोमादौ पशुपदस्य भेदेनान्वयोपि व्युत्पत्तिवैचित्र्यात् पथ्यपक्वेत्यादावेकदेशे भेदेनान्वयस्तथा क्वचिद
भेदेनापि फलानुरोधित्वात्कल्पनायाः एवं गोपदं गोस्वामिपरं गवि च चित्रादेरभेदेनान्वयबोधः एवमन्यत्रापि अत एव चित्रगुपदाच्चित्रगो
स्वामीति शाब्दबोधो निराकांक्षपदमादधातीति प्राहुः भूवादयो धातव इत्यादौ तद्गुणसंविज्ञानबहुव्रीहौ वादिशब्देन
गणपठितत्वनिमंत्रितत्वादिना लक्षणा भूप्रभृतिचतात्पर्यग्राहकमित्येके भूत्ववात्वादिचैत्रत्वमैत्रत्वादिना नानारूपेणैव लक्षणा युगप
दिति द्वयस्यानभ्युपगमात् पुष्पवन्तादिपदे नानारूपेणैकशक्तिविना नानारूपेणैव लक्षणायाः स्वीकारादित्यपरे चैत्रमाद्यः प्रात्यपाचैत्र
त्वादिशब्दश्च मैत्रत्वादितोपस्थापकः नचैवं वहुनापि चैत्रपदार्थादिपदार्थयोरभेदेन प्राथमिकान्वयबोधस्यापन्नतात्पर्य
विषयत्वात् द्वंद्वेत द्वत्वादिप्यन्य यत्र प्रकृतपदार्थस्यान्यपदार्थान्वयिना नान्वयः स तद्गुणसंविज्ञानो बहुव्रीहिः लंबकर्णमान
येत्यत्रापि लंबकर्णविशिष्टस्यानयनाद्यन्वये समानकालीनत्वसंसर्गेण लंबकर्णपि तत्रान्वयो व्युत्पत्तिवैचित्र्यात्तदितरो
तद्गुणसंविज्ञान इति वदन्ति एतेन तत्पुरुषे राजपुरुषादौ ग्रामगतादौ च पुरुषादौ राजादिसंबंधस्य गमनादौ च ग्रामादिकर्मत्वा
देरवगमो न तत्संसर्गविषयता नामार्थयोर्धात्वर्थनामार्थयोश्च नान्यतादात्म्यातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वात् अत एव राजादिप

दस्य राजादिसंबंधलक्षणापि न युज्यते नापि लुप्तषष्ठ्यादिस्मरणात् तल्लोपस्य ज्ञानतात्पर्य
न्वयबोधात् तस्माद्राजपुरुषादिसमुदायस्य राजपुरुषादौ शक्तिरेव निरस्तम् राजपदस्य रा
जसंबंधिनि ग्रामपदस्य ग्रामकर्मके लक्षणया पुरुषादौ तादात्म्येन तदन्वयबोधादेव सर्व
सामंजस्यात् नचैवं राज्ञः पुरुषो राजपुरुष इत्यनयोः समानार्थकताव्यवहारो न स्यात्

राजसंबंधी पुरुषो राज्ञः पुरुषश्चानयोरिव संबंधप्रकारिकबोधजनकत्वेन तत्पुरुषव्यवहारोपपत्तेः नचैवं नीलोत्पलेत्यादावपि कर्मधारयापत्तिः किं
चिद्विशिष्टद्वितीयादिविभक्त्यर्थतावच्छेदकविशिष्टवत्तायत्र नाभेदधीस्तत्रैव कर्मधारयत्वाभ्युपगमात् अत एव राजपुरुषमानयेत्यत्र राजप्रका
रेण लक्षणायां कर्मधारयत्वं नीलोत्पलेत्यत्र नीलपदस्य नीलगुणेन लक्षणायामेककर्मधारयत्वं नीलसंबंधिनि लक्षणायां तत्पुरुषत्वमेव रा
जपदस्य संबंधिमात्रपरत्वे कर्मधारयसंपत्तये किंचिद्विशिष्टत्वमुक्तं समासस्वर्वदशायामपि यत्राभेदधीस्तत्रैव कर्मधारयः तत्पुरुषे तु नैवमिति पक्षद्वयमपि
प्रामाणिकम् शोभनराजपुरुषेत्यादौ तु राजपदमेव शोभनराजसंबंधिपरं शोभनपदं तत्तात्पर्यग्राहकम् तत्र राजपदं राजसंबंधिपरमेव एकदेशे
पि च वा त्विति शोभनस्याभेदेनान्वयो व्युत्पत्तिवैचित्र्यादित्यपि वदंति अर्द्धपिप्पल्यादौ तत्पुरुषे उत्तरपदमेव पिप्पल्यादिसंबंधिनि लक्षणा तत्र पू
र्वपदार्थ एव विभक्त्यर्थान्वयात् स्यादेतत् नामार्थयोरभेदेनान्वयबोधे नाम्नोः समानविभक्तिकत्वं तन्त्रम् नीलो घटो नीलो घट इत्यादितो जा
त्वपि नीलघटयोरभेदानवगमात् नच विभक्तिराहित्यमेव तन्त्रं गौरवात् नीलघटपदमित्यादौ नीलघटयोरभेदान्वयबोधप्रसंगाच्च न
प्यायात्त्वर्थनामार्थान्वयबोधे नाम्नोऽनन्तरद्वितीयाद्यपि तन्त्रम् स्तोकं पचतीत्यादावपि स्तोकं पचतीत्यादावन्वयावबोधात् एवं च राजपुरुषग्राममग
तादौ नीलोत्पलस्तोकपाकादौ च पूर्वापरपदार्थयोरभेदानुभवस्याशक्यत्वात् तत्पुरुषे कर्मधारये च समुदायशक्तिरेवेति मैवम् नीलोत्प
लस्तोकपाके इत्यादौ विनापि नीलोत्पलादिरूपविशिष्टार्थेहतिश्रुति संधानं विशिष्टार्थबोधस्यानुभवसिद्धत्वात् समासानतिरिक्त एव समा
नविभक्तिकत्वादेस्तन्त्रत्वात् अत एव लाघवान्नामार्थयोरन्वयबोध एवाव्युत्पन्नः नीलघटमानयेत्यादौ च विशेषणविभक्तेरभेदस्यादतात्पर्यार्थः
गभीरायां नद्यामित्यत्रैव विशेष्यादिपदं वा विशिष्टार्थकमित्यपि निरस्तं नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकतया घटविशेष्यादिप
दे विशिष्टार्थकतायाश्च तात्पर्यसंधानं विनापि विशिष्टान्वयबोधस्यानुभवसिद्धत्वाच्च अस्तु वा तत्पुरुषे कर्मधारये च सर्वत्रोत्तरपद एव तज्जदर्थलक्ष
णा पदांतरं च तात्पर्यग्राहकम् एवं च राजपुरुषादिपदाद्राजप्रकारिका राजसंबंधप्रकारिका च पुरुषधीरप्युपपद्यते न चैवं लक्षणाभ्युपग
मादिति दिक् नव्यास्तु नामार्थयोर्धात्वर्थनामार्थयोश्चाभेदेनान्वयबोधस्य समासातिरिक्त एवाव्युत्पन्नत्वात् कल्पनायाः फलानुरोधित्वा
त् अन्वयबोधाकांक्षाज्ञानकार्यकारणयोरिति विशेषत एव विश्रामेण गौरवस्याप्यनवकाशात् पुरुषादौ राजादेः षष्ठ्यर्थः संबंधो ग्रामनादौ ग्रामा
देः कर्मत्वादिकं च संबंधः संबंधविधयैव भासते अत एव राजपुरुषादौ समुदायशक्तिः पदलक्षणा वा न विभक्तेश्च प्रतिसंधानमंतरेण
पि जायमानः सर्वानुभवसिद्धो राजपुरुषादिबोधो निराबाधं पदमाधाति एवं च पुरुषादौ राजसंबंधप्रकारिका कादाचित्की धीरप्युपपद्यते

पिनलक्षणाकर्मधारयेपिनलक्षणा तदा षष्ठीसमासपक्षेपि
त्रैवर्णिकस्यैव निषादस्थपतित्वावोधनेनाप्रामाण्यप्रसक्ते
रकल्पनात् निषेधविध्योः संकोचाभावाच्चेति चेन्न तत्पक्षे ४

नचपंकजनिकर्त्रकुमदवोधप्रतिवंधार्थं तत्स्वीकारः सतितत्र तात्पर्यादौ विनापि लक्षणां तद्वोधस्येष्टत्वात् अन्यथा तदभावादेव तद्वोधोपपत्तेरिति चेन्न
स्यादेवं यदि समुदायेशक्त्या व्यवहारोन प्रामाणिकः एकपदार्थयोः परस्परमनन्वयव्युत्पत्त्यावपि ङप्रत्ययस्य पंकजकर्तृपद्मलक्षणयामुर्वीकृत्वात्
वहुव्रीहावविपदान्तरस्य तात्पर्यग्राहकत्वेनैवं वैयर्थ्याभावादिति प्राञ्चः नन्वेवं निषादस्थपतिं याजयेदित्यत्र निषादानां स्थपतिरिति न षष्ठीसमासः
किन्तु निषादश्चासौ स्थपतिश्चेति कर्मधारय इति सिद्धान्तो व्याहन्येत तत्पुरुषे पदलक्षणासत्वात् कर्मधारयेतदभावादेव हितत्रकर्मधारयस्तन्मते लौकिकोनि
षादस्याप्राप्तविद्यासंयोगः स्त्रीशूद्रौ नाधीयातामित्यत्र निषादीयतत्तदध्ययनेन विध्यर्थे निषेधवाधादध्ययनपदे तत्तदध्ययनेतरपरतया संकोचश्च
कल्प्यते नचतत्र शूद्रपदस्य निषादेतरशूद्रपरतया संकोचः निषादस्य वेदान्तराध्ययनप्रसंगात् यदिच तत्पुरुषे लक्षणापक्षेपि किमिति कर्मधारय
2 एवाङ्गीक्रियते नतत्पुरुषः शक्तिलक्षणयोरपि शाब्दधीप्रयोजकतायाः तुल्यत्वेन गौरवानवकाशात् अथ शक्यसंवंधरूपलक्षणाज्ञाने विशेषणता
नवियया हेतोः शक्तिज्ञानादेव शाब्दवोधोपपत्तौ न लक्षणाज्ञानं कल्प्यते गौरवात् तथाज्ञानस्य शक्तिविषयकत्वापेक्षया लक्षणाविषयकत्व
मपि गुरुलक्षणाया वहुपदार्थघटितत्वादिति भवेदेवं षष्ठीसमासेनापि यदि कस्यचिद्वोधो न स्यात् नचैवं तादृशवोधस्यैतस्याप्यनुभवसिद्धत्वात्
अथास्ति विशेषतो वाधके स्वशक्यार्थ एव प्रामाण्यं वेदानां नतु प्रमाणान्तराविषयेपि लक्ष्यार्थे तथैवानादिमीमांसासंप्रतिपत्तेरिति चेदस्ति वि
शेषतो वाधके कर्मधारयविधयैव वेदानां प्रामाण्यं नतु प्रमाणान्तराविषयेपि तत्पुरुषादिविधया तत्प्रवेतितत्वम् वहुव्रीहितत्पुरुषस्य वल
वत्वे त्वयाप्येषैवरीतिरनुसर्तव्या नचवहुव्रीहेः सर्वपदानां लाक्षणिकत्वाद्दौर्वल्यम् एकपदलक्षणयापि वहुव्रीहेरुपपादितत्वादिति संक्षेपः
उपकुंभं निर्मक्षिकमित्याद्यव्ययीभावे तु नोत्तरपदे कुंभादिसंवंधेन लक्षणावश्यकी अव्ययनिपातातिरिक्तप्रनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत
यापाद्यर्थे शक्तात्कुंभादेर्लक्षणया कुंभादिसंवंधस्याप्यन्वयवोधसंभवात् चैत्रश्चन्द्रमुखमित्यादाविवाद्यर्थे सादृश्यपादौ चन्द्रादेरन्वयवोधस्यानु
भवसिद्धतया व्युत्पत्तिसंकोचस्यावश्यकत्वात् अतएव नपठन्ति चैत्रस्यादावभावाधिकरणयोर्भेदसंसर्गेन घटस्यादावभावप्रतियोगिनोर्भेदे
लनघटस्यादावुभयोरेव तयोः संवंधः संवंधविधया भासते नन्तत्पुरुषे